International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 88-90
© 2018 IJSR
www.anantaajournal.com
Received: 17-11-2017
Accepted: 18-12-2017

ईशिता हाजरा
वर्धमान विश्वविद्यालय गवेषणारत,
राजस्थान भारत

**Correspondence**
ईशिता हाजरा
वर्धमान विश्वविद्यालय गवेषणारत,
राजस्थान भारत

# काव्यहेतुनिरूपणे विविधः आलंकारिकमतः

**ईशिता हाजरा**

**सारसंक्षेपः**
कविकर्म काव्यम्। समाजदर्पणभूते काव्ये कविभिः सत्यशिवसुन्दरस्य स्वरूपम् उपास्थपितम्। काव्यजगति कविः एव प्रजापतिः, स स्रष्टा। काव्यरचना न तु आकस्मिकी घटना। विविधालं- कारिकैः काव्योद्भवविषये विविधहेतुः उपस्थापितः। तेषां प्रतिभाव्युत्पत्तिरभ्यासः मुख्यरूपेण स्वीकृतः। प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा। तया विविधविषयः काव्ये उपस्थापितः। वहुज्ञता व्युत्पत्तिः। अभ्यासः पुनः पुनः काव्यकरणादौ प्रवृत्तिः। आलंकारिकमते एतेन त्रिविधहेतुसम्मिलनेन उत्कृष्टकाव्यम् सृष्टम्।

**कुटशव्दः** काव्यम्, काव्यहेतुः, प्रतिभा, शक्तिः, प्रज्ञा, व्युत्पत्तिः,अभ्यासः।

## प्रस्तावना

सत्यशिवसुन्दरपरमात्मास्वरूपम् कविहृदये जायते। तत्स्वरूपम् विश्वमध्ये प्रकाशनाय कविना काव्यम् रचितम्। कविकर्म एव काव्यम्। काव्यम् कवे : वाङ्मविग्रहः। कविभावनाप्रकाशत्वम् काव्यत्वम्। स यत्स्वभाव : कविः तदनुरूपम् काव्यम्।१ मन्त्रद्रष्टा ऋषिरपि कविः। प्रातिभप्रत्यक्षत्वम् ऋषित्वम् कवित्वम् वा। अग्निर्होता कविक्रतुः।२ क्रान्तप्रज्ञत्वम् त्रिकालोत्तीर्णत्वम्। कविरपि त्रिकालोज्ञ, तस्य सृष्टिः अपि चिरन्तनी। अतः उक्तम् आनन्दवर्धनेन -

> "अपारे काव्यसंसारे कविरेक प्रजापतिः।
> यथाऽस्मै रोचते विश्वम् तथैव परिवर्तते।।"३

काव्यसंसारे कविः प्रजापतिः, स एव स्रष्टा। किन्तु काव्यरचना न केवलम् आकस्मिकी घटना। काव्यरचनायै विविधहेतुः दृश्यते।

> "शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
> काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।"४

इत्यस्मिन् वाक्ये मम्मटेन काव्योद्भवस्य हेतुरुक्तः। काव्यस्य उद्भवविषये आलंकारिकमध्ये मतपार्थक्यम् दृश्यते। अतः इदं विचार्यमस्ति।
दण्डिनः मते नैसर्गिकी प्रतिभा निर्मलं वहु श्रुतम्, अमन्दश्चाभियोगः इति त्रयं काव्यसम्पत्तेः कारणम्। उक्तञ्च तेन -

> "नैसर्गिकी च प्रतिभा श्रुतं च वहु निर्मलम्।
> अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।"५

यदि नैसर्गिकी प्रतिभा न विद्यते, तथापि द्वितीयात् श्रुतात्, तृतीयाच्च यत्नात् काव्यसम्पद् जायते। उक्तञ्च तेन -

> "न विद्यते यद्यपि पूर्ववासना
> गुणानुवन्धि प्रतिभानमद्भूतम्
> श्रुतेन यत्नेन च वागुपासिता
> ध्रुवं करोत्येव कमप्यनुग्रहम्।"६

भामहमतेन काव्यनिर्माणे प्रतिभाया: मुख्यत्वम् स्वीकृतम्। शव्दार्थज्ञानं काव्यज्ञोपासनं, काव्यस्य पठनं चान्ये हेतव:। उक्तञ्च तेन–

"काव्यं तु जायते जातु कस्यचिद् प्रतिभावत:
शव्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्
विलोक्यान्यनिवन्धाश्च कार्य: काव्यक्रियादर:।।"७

रुद्रटमते शक्तिव्युत्पत्तिरभ्यासश्चेति काव्यकारणम्। उक्तञ्च तेन–

"त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यास:।"८

राजशेखरस्य मते शक्तिरेव काव्यस्य हेतु:। शक्तित: एव प्रतिभा व्युत्पत्ति: जायते। उक्तञ्च–
सा (शक्ति:) केवलं काव्ये हेतु: इति यायावरीय:। शक्तिकर्तृके हि प्रतिभाव्युत्पत्तिकर्मणी। शक्तस्य प्रतिभाति, "शक्तश्च व्युत्पद्यते"९ हेमचन्द्रस्य मते प्रतिभा एव काव्यस्य कारणम्। तेन उक्तम् प्रतिभाऽस्य हेतु:।१० पण्डिताराजजगन्नाथेन कविगता केवला प्रतिभा एव काव्यस्य हेतुरूपेण उपस्थापिता। तेन उक्तम् ;

"तस्य (काव्यस्य) च कारणं कविगता केवला प्रतिभा।"११

मम्मटमते शक्तिव्युत्पत्तिरभ्यासश्चेति काव्योद्भवे हेतु:। तत्र शक्ति शव्देन प्रतिभा द्योतिता। कवि: वर्णनानिपुण:। तस्य वर्णना प्रतिभया उपस्थापिता। प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा। प्रतिभा का? तस्या: लक्षणा जगन्नाथेन अपि उक्तम् –

"सा च काव्यघटनानुकूलशव्दार्थोपस्थिति:।"१२

शक्तिविशेषरूपा प्रतिभा अतीन्द्रिया, सा कार्यैकगम्या शक्ति विशेषा। कार्यं च प्रतिभाया: काव्यरचनोपयुक्तयो: शव्दार्थयो: झटिति उपस्थिति:। उक्तं च राजशेखरेण – "या शव्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा। अप्रतिभस्य पदार्थसार्थ: परोक्ष इव। प्रतिभावत: पुनरपश्यतोऽपि प्रत्यक्ष इव।"१३
प्रतिभया कवे: परोक्षविषये प्रत्यक्षत्वम् जायते। यथा वाल्मीकिचित्ते रामचरितम् उद्भासितम्, तत् महाकाव्ये प्रतिफलितम् च। तत्र च कारणं प्रतिभाया: उदय:। प्रतिभया कविहृदये परोक्ष–स्थूल–सूक्ष–व्यवहृत–अव्यवहृतपदार्थ: प्रतिफलित:। महिमभट्टेन अपि उक्तम् –

"रसानुगुणशव्दार्थचिन्तास्तिमितचेतस:
क्षणं स्वरूपस्पर्शोत्था प्रज्ञैव प्रतिभा कवे:।।
सा हि चक्षुर्भगवतस्तृतीयमिति गीयते
येन साक्षात्करोत्येष भावांस्त्रैकाल्यवर्तिन:।।"१४

प्रज्ञा–विशेषा एव प्रतिभा। तया इन्द्रियासन्निकृष्टार्थ: उद्भासित:। यद्यपि शव्दस्य सामान्यमात्रावगाहित्वं प्रसद्धम्, विशेषश्च प्रत्यक्षमात्रगोचर:, शव्दादीनां प्रमाणानां गोचरतामतिक्रान्तस्तथापि प्रतिभासमर्पितात् शव्दात् तस्यापि प्रतिपत्ति: सुलभा भवति। तथा च उक्तं महिमभट्टेन –

"यत: साक्षादिवाभान्ति तत्रार्था: प्रतिभार्पिता:।"१५

न खलु सर्वे प्रतिभावन्त:। कवीनां मध्ये उत्तममध्यमादिभेदेन तारतम्यं दृश्यते। द्वयं खलु कारणं जगन्नाथेनोपस्थापितम्। तत्रैकम् – "तस्याश्च (प्रतिभाया:) हेतु: क्वचिदेवतामहापुरुष– प्रसादादि जन्ममदृष्टम्।"१६
एतच्च वाल्मीकिदृष्टान्तेन शास्त्रप्रमाणसिद्धं भवति। श्रूयते च – कविकर्णपूरस्य प्रतिभोदय: शैशवे भगवतश्चैतन्यदेवस्य पादाङ्गुष्ठचोषपन्निवन्धन:। एतत्तु अदृष्टं करणम्। दृष्टं पुन कारणम्–

"विलक्षणव्युत्पत्ति काव्यकरणाभ्यासौ"१७

व्युत्पत्तिस्तु – "वहुज्ञता व्युत्पत्ति:।"१८ लोकशास्त्रकाव्यद्यवेक्षणात् समुल्लसितो निपुणताविशेषो व्युत्पत्तिरिति महिमभट्ट:। अभ्यास: पुन: पुन: काव्यकरणादौ प्रवृत्ति:। एताभ्यां वैलक्षण्यं प्राप्ताभ्यां प्रतिभा प्रादुषिक्रयते इति जगन्नाथस्याशय:। मम्मटभट्टादीनां मते एतौ प्रतिभाया उत्कर्षमादधाते।

"प्रतिभाव्युत्पत्ती मिथ: समवेते श्रेयसौ इति यायावरीय:।
न खलु लावण्यलाभादृते रूपसम्पत् ऋते रूपमम्पदो वा लावण्यवुत्पत्तिमांश्च कवि: कवि:।"१९

इति वचनेन राजशेखर: उभयो: समानाधिकरणयो: कवित्वसम्पदकत्वं प्रतिपादयत्। मम्मटभट्टेन एतत् स्वीकृतम्। जगन्नाथस्तु व्युत्पत्यभ्यासौ प्रतिभाकारणत्वेन प्रतिजानीते। राजशेखरेण त्रिविधा प्रतिभा स्वीकृता सहजा, आहार्या,औपदेशिकी च। तत्र जन्मान्तरसंस्कारजन्या सहजा। जन्मसंस्कारयोनिराहार्या। मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी। सहजा ऐहिकेन स्वल्पेनैव संस्कारेणाविर्भवति। महता पुनराहार्या। उपदेशिक्यास्तु ऐहिक एव उपदेशकाल:, ऐहिक एव संस्कारकाल: इति स्वयमेव व्याख्यातम्।२० अनेन च वालकवित्वम् व्याख्यातम्, तस्य सहजैव प्रतिभा। द्वितीयायास्तु परिपाके कालानैवाविर्भाव:। तत्र संस्कारादिसहकारिसम्पत्तिरपेक्षते। तृतीया तु ऐहिक्येव। सा हि जगन्नाथप्रतिपादितदृष्ट–कारणजन्या। तथापि न व्युत्पत्तिरस्या: प्रतिभाया: कारणत्वेनाङ्गीकृता राजशेखरेण। मम्मटभट्टस्य ईदृश: प्रतिभाविशेष: न संप्रतिपन्न:।
जगन्नाथमते प्रतिभैव कारणं काव्यस्य। व्युत्पत्त्यभ्यासौ पुन: प्रतिभां प्रति सहकारिभूतौ। त्रयाणां मिलितानामेव दन्डचक्रादिन्यायेन कारणत्वमङ्गीकुर्वता मम्मटेन कारणकारणत्वेन न अन्यथासिद्धकारणत्वमुररीकृतम्। "हेमचन्द्रमते प्रतिभाऽस्य (काव्यस्य) हेतु:। व्युत्पत्त्यभ्यासाभ्यां संस्कार्या।"२१
काव्यहेतुमिरूपणे आलंकारिकै: विविधानि कारणानि उपस्थापितानि।। तेषां कतरदुपादेयं, कतरद् वा हेयमित्यैकान्तिकतया न निर्णेतुम् शक्यम्। तथापि प्रतिभाव्युत्पत्तिरभ्यास: काव्यनिर्माणे प्रधान हेतु। प्रतिभा काव्यस्यात्मलाभेहेतु:, व्युत्पत्त्यभ्यासौ तस्योपादेयत्वतारतम्ये संपादयत:। त्रिविधहेतुसम्मिलने उत्कृष्टम् काव्यम् सृष्टम् – इति सिद्धान्त: प्रतिष्ठित:।

**तथ्यसूत्राणि**


१. ध्वन्यालोक आनन्दवर्धन
२. ऋक्वेद: अग्निसूक्तम् १.१.५
३. धन्यालोक: आनन्दवर्धन ३.११६
४. मम्मट काव्यप्रकाश: १.३
५. दण्डि काव्यादर्श: १.१०३
६. दण्डि काव्यादर्श १.१०४
७. भामह काव्यालङ्कार: १.५
८. रुद्रट काव्यालङ्कार: १/१४
९. राजशेखर काव्यमीमांसा ४

१०. हेमचन्द्र काव्यानुशासनम्‌ १
११. जगन्नाथ रसगङ्गाधर १
१२. जगन्नाथ रसगङ्गाधन १
१३. राजशेखर काव्यमीमांसा ४
१४. महिमभट्ट व्यक्तिविवेक २, ११७-११८
१५. महिमभट्ट व्यक्तिविवेक २, ११०
१६. पण्डितराज जगन्नाथ रसगङ्गाधर १
१७. पण्डितराज जगन्नाथ रसगङ्गाधर १
१८. राजेशखर काव्यमीमांसा ५
१९. राजेशखर काव्यमीमांसा ५
२०. राजेशखर काव्यमीमांसा ४
२१. हेमचन्द्र काव्यानुशासनम्‌ १

।। **ग्रन्थपञ्जी** ।।


1. आनन्दवर्धन - ध्वन्यालोकः, सम्पा. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता १९९८।
2. दास, देवकुमार - संस्कृत साहित्येर इतिहास, वलराम प्रकाशनी, कलकाता, २००१।
3. नन्दी, सुधीरकुमार - दर्शनजिज्ञासा, वर्धमान विश्वविद्यालय, वर्धमान, १९८५।
4. भरत - नाट्यशास्त्रम्‌ (खण्ड-१) चौखाम्वा संस्कृत सिरिज अफिस, वाराणसी, २००२।
5. मम्मट-काव्यप्रकाशः, सम्पा. ड. गङ्गानाथ झा, भारतीय विद्याप्रकाशना, दिल्ली, वाराणसी।
6. राजशेखर-काव्यमीमांसा, सम्पा. नागेन्द्रनाथ चक्रवर्ती, विश्वभारती, शान्तिनिकतन, १९६०।
7. विश्वनाथ कविराज - साहित्यदर्पणः, सम्पा. - विमालाकान्त मुखोपाध्याय, पुस्तकाश्री कलकाता-८।
8. वसु, अनिलचन्द्र, काव्यादर्शः, संस्कृत वुक डिपो, २००२।